Prepp
Your Personal Exams Guide

# UGC NET PAPER 2 NOVEMBER 05, 2017 SHIFT 1 SANSKRIT QUESTION PAPER

**Note :** This paper contains **fifty (50)** objective type questions, of **two (2)** marks each. **All** questions are **compulsory**.

**सूचना :** इस प्रश्नपत्र में **पचास** (50) बहु–विकल्पीय प्रश्न हैं। प्रत्येक प्रश्न के **दो** (2) अंक हैं। **सभी** प्रश्न **अनिवार्य** हैं।

**सूचना :** अस्मिन् प्रश्नपत्रे **पञ्चाशत्** परिमिताः (50) बहु–वैकल्पिकाः प्रश्नाः सन्ति। प्रत्येकम् प्रश्नस्य **अङ्कद्वयं** वर्तते। **सर्वे** प्रश्नाः समाधेयाः।

1. ऋग्वेदे प्रथमसूक्तस्य द्रष्टा कः ?
   (1) कण्वः (2) विश्वामित्रः (3) मधुच्छन्दाः (4) गृत्समदः

2. सायणाचार्येण कस्य वेदस्य व्याख्यानं सर्वान्ते कृतम् ?
   (1) ऋग्वेदस्य (2) यजुर्वेदस्य (3) सामवेदस्य (4) अथर्ववेदस्य

3. 'स्वधा अवस्तात् प्रयतिः परस्तात्' – इति कुत्र वर्णितम् ?
   (1) इन्द्रसूक्ते (2) पितृसूक्ते (3) हिरण्यगर्भसूक्ते (4) नासदीयसूक्ते

4. ऋग्वेदे 'रुशद्वत्सा' इति कस्या विशेषणम् ?
   (1) सरस्वत्याः (2) उषसः (3) नद्याः (4) रात्र्याः

5. सपत्नक्षयणो मणिः कस्मिन् सूक्ते उपदिश्यते ?
   (1) पृथिवीसूक्ते (2) इन्द्रसूक्ते (3) राष्ट्राभिवर्द्धनसूक्ते (4) सोमसूक्ते

6. 'यज्जाग्रतो दूरमुदैति दैवम्' – इत्यत्र उवटमतेन 'दैवम्' पदस्य कोऽर्थः ?
   (1) देवो विज्ञानात्मा सोऽनेन गृह्यत इति दैवम्
   (2) देवो ज्ञानकर्ता सोऽनेन ज्ञानी इति दैवम्
   (3) देवो यज्ञे एव दीप्यते तद् द्रव्यम् दैवम्
   (4) देवो गृहे गृहे निर्मलीकरोति तज्जलं दैवम्

7. निम्नाङ्कितेषु प्रकृतिपाठः कः ?
   (1) मालापाठः (2) रेखापाठः (3) पदपाठः (4) दण्डपाठः

8. निचृद्गायत्रीच्छन्दसि कियन्तो वर्णा भवन्ति पिङ्गलदिशा ?

(1) 22 (2) 23 (3) 24 (4) 25

9. 'रात्रीभिरस्मा अहभिर्दशस्य' - इति कुत्र वर्णितम् ?

(1) सूर्यसूक्ते (2) यमयमीसूक्ते (3) रात्रिसूक्ते (4) कालसूक्ते

10. कठारण्यकं केन वेदेन सम्बद्धं वर्तते ?

(1) ऋग्वेदेन (2) शुक्लयजुर्वेदेन (3) सामवेदेन (4) कृष्णयजुर्वेदेन

11. 'इदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकञ्च' - इत्युक्तिः कुत्र प्राप्यते ?

(1) पाणिनीयशिक्षायाम् (2) निरुक्ते (3) ऋक्प्रातिशाख्ये (4) सिद्धान्तकौमुद्याम्

12. 'ओरायन' - ग्रन्थस्य लेखकः कः ?

(1) शङ्करपाण्डुरङ्गपण्डितः (2) बालगङ्गाधरतिलकः

(3) शङ्करबालकृष्णदीक्षितः (4) विन्टरनित्सः

13. 'दमूना' इति कस्य देवस्य विशेषणम् ?

(1) इन्द्रस्य (2) अग्नेः (3) वरुणस्य (4) रुद्रस्य

14. 'य एक इद्धव्यः चर्षणीनामिन्द्रम्' - मन्त्रेऽस्मिन् कस्यार्षम् ?

(1) भरद्वाजस्य (2) वामदेवस्य (3) अत्रेः (4) कण्वस्य

15. धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वार्थवच्छब्दस्वरूपं किम्भवति ?

(1) पदसञ्ज्ञम् (2) प्रातिपदिकसञ्ज्ञम् (3) संहितासञ्ज्ञम् (4) 'घि' सञ्ज्ञम्

16. 'द्रोणो व्रीहिः' इत्यत्र 'द्रोण' शब्दोत्तरप्रथमा विभक्तिः कस्मिन्नर्थे भवति ?

(1) प्रातिपदिकार्थमात्रे (2) लिङ्गमात्राधिक्ये (3) परिमाणमात्राधिक्ये (4) वचनमात्रे

17. 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ' इति सूत्रस्य प्रत्यवसानार्थे किमुदाहरणम् ?

(1) आशयच्चामृतं देवान् (2) वेदमध्यापयद्विधिम्

(3) आसयत् सलिले पृथ्वीम् (4) वेदार्थं स्वानवेदयत्

18. 'नमस्कुर्मो नृसिंहाय' इत्यत्र अप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थीविधायकम् अनुशासनं किमस्ति ?
    (1) तादर्थ्ये चतुर्थी वाच्या
    (2) तुमर्थाच्च भाववचनात्
    (3) क्रियार्थोपपदस्य च कर्मणि स्थानिनः
    (4) नमः स्वस्ति-स्वाहा-स्वधाऽलं वषड्योगाच्च

19. अष्टौ च दश चेति विग्रहे 'अष्टादश' इति प्रयोगे आकारान्तादेशः केन विधीयते ?
    (1) 'आन्महतः समानाधिकरणजातीययोः' इत्यनेन
    (2) 'अष्टनः कपाले हविषि' इत्यनेन
    (3) विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्' इत्यनेन
    (4) 'द्व्यष्टनः सङ्ख्यायामबहुव्रीह्यशीत्योः' इत्यनेन

20. 'परार्थाभिधानं वृत्तिरि' ति वृत्तिलक्षणं कस्मिन् प्रयोगे न प्रवर्तते ?
    (1) विद्यते (2) कुम्भकारः (3) औपगवः (4) पीताम्बरः

21. 'हरि-शब्दस्य प्रकाशः' 'इतिहरि' इत्यत्र 'अव्ययं विभक्ती' त्यादिना कस्मिन्नर्थेऽव्ययीभावः ?
    (1) विभक्त्यर्थे (2) शब्दप्रादुर्भावे (3) यौगपद्ये (4) अर्थाभावे

22. 'यतश्च निर्धारणम्' इति सूत्रेण जातिविशिष्टसमुदायादेकस्य निर्धारणे विहितायाः षष्ठ्याः किमुदाहरणम् ?
    (1) गवां कृष्णा बहुक्षीरा (2) गच्छतां धावन् शीघ्रः (3) नृणां द्विजः श्रेष्ठः (4) छात्राणां मैत्रः पटुः

23. चीनीभाषा निम्नलिखितेषु कस्मिन् वर्गे वर्तते ?
    (1) श्लिष्टयोगात्मके (2) अश्लिष्टयोगात्मके (3) प्रश्लिष्टयोगात्मके (4) अयोगात्मके

24. ग्रीकभाषा कस्य परिवारस्य भाषा वर्तते ?
    (1) सामीपरिवारस्य (2) हामीपरिवारस्य (3) भारोपीयपरिवारस्य (4) बान्तूपरिवारस्य

25. निम्नलिखितासु का भाषा 'केन्तुम्' वर्गस्य नास्ति ?
    (1) ग्रीकभाषा (2) केल्टिकभाषा
    (3) जर्मनभाषा (4) रूसीभाषा

26. 'अश्वः' इत्यस्य शब्दस्य 'अवेस्ता' भाषायां किं रूपं विद्यते ?
    (1) अश्वः (2) अश्बो (3) अश्पः (4) अस्पो

www.prepp.in

Prepp Your Personal Exams Guide

27. सञ्ज्ञासञ्ज्ञिसम्बन्धप्रतीतिः किमुच्यते न्यायनये ?

(1) अनुमितिः (2) उपमितिः (3) प्रत्यक्षम् (4) शब्दः

28. तुरी-वेमादिकं न्यायनये पटस्य कीदृशं कारणं मन्यते ?

(1) निमित्तकारणम् (2) समवायिकारणम्

(3) समवाय्यसमवायिकारणम् (4) असमवायिकारणम्

29. तर्कसङ्ग्रहदिशा अन्वय-व्यतिरेकदृष्टान्तरहितो हेत्वाभासः कः ?

(1) अनुपसंहारी (2) साधारणः

(3) असाधारणः (4) विरुद्धः

30. 'वह्निरनुष्णो द्रव्यत्वात्' इत्युदाहरणं कस्य हेत्वाभासस्य ?

(1) आश्रयासिद्धहेत्वाभासस्य (2) व्याप्यत्वासिद्धहेत्वाभासस्य

(3) स्वरूपासिद्धहेत्वाभासस्य (4) बाधितहेत्वाभासस्य

31. वेदान्तसारानुसारं 'नित्यनैमित्तिकप्रायश्चित्तोपसनानां त्ववान्तरफलम्' किम् ?

(1) स्वर्गलोकप्राप्तिः (2) पितृलोकसत्यलोकप्राप्तिः

(3) शरीरशुद्धिः (4) पापकर्मफलविनाशः

32. वेदान्तसारस्य 'विद्वन्मनोरंजनी' इति नाम्न्याः टीकायाः रचयिता कोऽस्ति ?

(1) सदानन्दः (2) नृसिंह सरस्वती (3) रामतीर्थः (4) कृष्णतीर्थः

33. विज्ञानमयकोशः किं भवति ?

(1) निर्गुणं ब्रह्म (2) सगुणं ब्रह्म

(3) ज्ञानेन्द्रियसहिता बुद्धिः (4) ज्ञानेन्द्रियसहितं मनः

34. 'अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा'
स्थितिरियं समाधेः कीदृशो विघ्नः ?

(1) विक्षेपः (2) कषायः (3) लयः (4) रसास्वादः

35. सांख्यकारिकानुसारं सृष्टेरुत्पत्तिः कस्माद् भवति ?

(1) असतः (2) सतः (3) नासतः न सतः (4) पुरुषात्

36. पुरुषस्य सत्ता कस्मात् सिद्ध्यति ?

(1) कारणभावात् (2) कार्यभावात् (3) भोक्तृभावात् (4) उत्पत्तिभावात्

37. सांख्यदर्शनानुसारं करणं कतिविधं वर्तते ?

(1) चतुर्दशविधम् (2) षोडशविधम् (3) एकादशविधम् (4) त्रयोदशविधम्

38. 'स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या'

इत्यस्यां पङ्क्तौ 'त्रय' इत्यनेन पदेन किमभिधीयते ?

(1) बुद्धिर्, अहङ्कारः मनश्च

(2) मनः, ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च

(3) पञ्चतन्मात्राणि, पञ्चमहाभूतानि पञ्चप्राणाश्च

(4) पुरुषः, अव्यक्तम् व्यक्तम् च

39. समीचीनां तालिकां चिनुत–

| | | | |
|---|---|---|---|
| (a) | मेघदूतम् | (i) | भट्टनारायणः |
| (b) | रत्नावली | (ii) | अश्वघोषः |
| (c) | वेणीसंहारः | (iii) | कालिदासः |
| (d) | बुद्धचरितम् | (iv) | हर्षः |

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (1) | (iv) | (iii) | (ii) | (i) |
| (2) | (iii) | (i) | (ii) | (iv) |
| (3) | (iii) | (iv) | (i) | (ii) |
| (4) | (iii) | (iv) | (ii) | (i) |

40. बुद्धचरिते सिद्धार्थस्य हृदि संवेगोत्पत्तौ प्रथमं कारणं किं वर्णितम् ?

(1) रुग्णस्य दर्शनम् (2) वृद्धस्य दर्शनम् (3) मृतस्य दर्शनम् (4) उद्यानस्य दर्शनम्

41. दशकुमारचरिते सुरतमञ्जर्याः उपाख्यानमस्ति–

(1) राजवाहनचरिते (2) अपहारवर्मचरिते (3) पुष्पोद्भवचरिते (4) उपहारवर्मचरिते

42. शिशुपालवधस्य सर्गसंख्या भवति–

(1) ऊनविंशतिः (2) विंशतिः (3) एकविंशतिः (4) द्वाविंशतिः

www.prepp.in

43. एषु किं खण्डकाव्यं भवति ?

(1) मेघदूतम् (2) शिशुपालवधम् (3) कादम्बरी (4) किरातार्जुनीयम्

44. अभिज्ञानशाकुन्तले धीवरवृत्तान्तः कस्य उदाहरणम् ?

(1) प्रवेशकस्य (2) विष्कम्भकस्य (3) अङ्कावतारस्य (4) अङ्कमुखस्य

45. मृच्छकटिके चारुदत्तस्य पुत्रः अस्ति–

(1) चन्दनकः (2) रोहितः (3) रोहसेनः (4) आर्यकः

46. "नारिकेलफलसम्मितं वचः" इति कस्य कवेः विषये प्रोक्तम् ?

(1) माघस्य (2) भारवेः (3) कालिदासस्य (4) श्रीहर्षस्य

47. साहित्यदर्पणानुसारेण एतेषु कस्य रूपकमध्ये गणना नास्ति ?

(1) प्रकरणस्य (2) त्रोटकस्य (3) व्यायोगस्य (4) भाणस्य

48. साहित्यदर्पणे "कुन्देन्दुसुन्दरच्छायः" इति कस्य रसस्य वर्णः वर्णितः ?

(1) वीरस्य (2) हास्यस्य (3) शृङ्गारस्य (4) शान्तस्य

49. साहित्यदर्पणे साकल्येन कतिप्रकारा लक्षणा प्रोक्ता ?

(1) अशीतिः (2) षोडश (3) द्वात्रिंशत् (4) अष्ट

50. साहित्यदर्पणानुसारेण रिक्तं स्थानं पूरयत–

स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः।

(1) लक्षणा (2) अभिधा (3) व्यञ्जना (4) वाक्यम्

- o 0 o -

Prepp
Your Personal Exams Guide

Space For Rough Work

Prepp Your Personal Exam Guide